ૐ || શ્રીરામ || ૐ

# શ્રી ગુરુવંદના

ગુરુબ્રહ્મા ગુરુર્વિષ્ણુ ગુરુર્દેવો મહેશ્વરઃ
ગુરુઃ સાક્ષાત્પર બ્રહ્મ તસ્મૈ શ્રી ગુરુવે નમઃ

અખંડમંડલાકારં વ્યાપ્તં યેન ચરાચરમ્
તત્પદં દર્શિતં યેન તસ્મૈ શ્રી ગુરુવે નમઃ

બ્રહ્માનંદં પરમસુખદં કેવલં જ્ઞાનમૂર્તિ
દ્વંદ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિલક્ષ્યમ્

એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતં
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ

ૐ ચૈતન્યં શાશ્વતં શાન્તં વ્યોમાતીતં નિરંજનમ્
નાદબિંદુકલાતીતં તસ્મૈ શ્રી ગુરુવે નમઃ

ગુરુમૂર્તિ સ્મરેન્નિત્યં ગુરુનામ સદા જપેત્
ગુરોરાજ્ઞાં પ્રકુર્વીત ગુરોરન્યત્ર ભાવયેત

ગુકારસ્ત્વન્ધકારશ્ચ રુકારસ્તેજ ઉચ્યતે
અજ્ઞાનગ્રાસકં બ્રહ્મ ગુરુરેવ ન સંશયઃ

ગુરોઃ પાદોદકં પીત્વા ગુરોરુચ્છિષ્ટ ભોજનમ્
ગુરુમૂર્તેઃ સદા ધ્યાનં ગુરુ મંત્રં સદા જપેત

નાનારૂપમિદં સર્વં ન કેનાપ્યસ્તિ ભિન્નતા
કાર્યકારણતા ચૈવ તસ્મૈ શ્રી ગુરુવે નમઃ

ધ્યાનમૂલં ગુરોર્મૂર્તિઃ પૂજામૂલં ગુરોઃ પદમ્
મંત્રમૂલં ગુરોર્વાક્યં મોક્ષમૂલં ગુરોઃ કૃપા

યસ્વ સ્મરણમાત્રેણ જ્ઞાનમુત્પદ્યતે સ્વયમ્
ય એવ સર્વસંપ્રાપ્તિસ્તસ્મૈ શ્રી ગુરુવે નમઃ

સ્થાવરં જંગમં ચૈવ તથા ચૈવ ચરાચરમ્
વ્યાપ્તં યેન જગત્સર્વં તસ્મૈ શ્રી ગુરુવે નમઃ

ન ગુરોરધિકં તત્ત્વં ન ગુરોરધિકં તપઃ
તત્ત્વં જ્ઞાનાત્પરં નાસ્તિ તસ્મૈ શ્રી ગુરુવે નમઃ

ગુરોઃ કૃપાપ્રસાદેન બ્રહ્માવિષ્ણુસદાશિવાઃ
સમર્થાઃ પ્રભવાદૌ ચ કેવલં ગુરુસેવયા